This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः। अथेह मृच्छकटिकस्य प्राकृतभाषायाश्छाया लिख्यते। तत्रापि अप्रसिद्धपदानां। तत्र स्थले एकार्थकमारभ्य भाषावाक्यानि लिखितानि संलिताह अन्येषा अपि बोधार्थं अंक
विन्यासः। तत्रापि अस्फुटपदं भाषायाः पूर्वं लिखितां संस्कृतस्य पर्यायः। एवं बोध्यं। अपिद। कष्टंकष्टं। किंपि। किमपि। १। २ हीमाणहे। आश्चर्यं। वद्दि। वर्तते। सोहदि। शोभते। उद्दीवंती
उद्दीप्यमाना। बाधेदि। बाधते।

॥अथ मृच्छकटिकप्रकरणस्य प्राकृतभाषाछायाप्रारभ्यते॥

Acc. No. ~~1890~~ M-1572
Title - मृच्छकटिकभाषा-छाया
Author - ?
Date - ?
Sub - Drama.
folio - 22
Xerox - 44.

KKSU LIBRARY
RAMTEK
441 106
M-1572
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा·घ·
१।।

श्रीमन्महागणाधिपतयेनमः। निर्विघ्नमस्तु। श्रीललितेपाहिमां। अनेकदेशप्रचलितासुराजावलीषुकोपिराजाविक्रमादित्यात्प्राचीनतरः शूद्रकोनाममगधदेशीयोऽभवत्। ते
नपाटलिपुत्राख्यनगरवासिनामृच्छकटिकंप्रकरणंनिर्मितं। तत्रबालभाषायाश्छायानीलकंठेनसूरिणाविरच्यते। कष्टं२भोः२चिरसंगीतोपासनेनशुष्कपुष्करनालानीवम
मबुभुक्षयाम्लानान्यंगानितद्यावद्गेहंगत्वाजानाम्यस्तिकिमपिकुटुंबिन्योपपादितंनवेति।१।एतत्तदस्माकंगेहंतत्प्रविशामि।२।आश्चर्यंकिंनुखल्वस्माकंगेहेऽपरमिवसंविधा
नकंवर्तते। आयामितंडुलोदकप्रवाहारथ्यालोहकटाहपरिवर्तनकृष्णसाराकृतविशेषकेवयुवतीअधिकतरंशोभतेभूमिः स्निग्धगंधेनोद्दीप्यमानेवाधिकंबाधतेमांबुभु
क्षा। तत्किंपूर्वार्जितंनिधानमुपलब्धंभवेत्। अथवाऽहमेवबुभुक्षातोऽन्नमयंजीवलोकंपश्यामि। नास्तिकिलप्रातराशोऽस्माकंगेहेप्राणाधिकंमांबुभुक्षाबाधते इहसर्वंनवमि
वसंविधानकंवर्तते। एकावर्णकंकरुहयीदिकंसमालंभनंपिनष्टिअपरासुमनसःगुंफति।३।किंन्वेदंभवतुकुटुंबिनीमाहूयपरमार्थंज्ञास्यामि।४।आर्येइतस्तावत्।५।आ
र्यइयमस्मि।६।आर्येस्वागतंते।७।आज्ञापयतुआर्यःकोनियोगःअनुष्ठीयतामिति।८।आर्येचिरसंगीतोपासनेनेत्यादिपठित्वा।अस्तिकिमपिअस्माकंगेहेअशितव्यंनवेति।९
आर्यसर्वमस्ति।१०।किं२मस्ति।११।तद्यथा।गुडोदनंघृतंदधितंडुलाः।आर्येणअशितव्यंरसायनंसर्वमस्तीति।एवंतेदेवाआशंसंतु।१२।आर्येकिंअस्माकंगेहेसर्वमस्तिअथ
वापरिहससि।१३।परिहसिष्यामितावत्।आर्यास्तिवणिग्वीथ्यां।१४।आः अनार्येएवंतवआशाघेत्स्यति।अभावंचगमिष्यसि।यदिदानीमहंवरंडलंबुकइवदूरमु
त्क्षिप्यपातितः।वरंडोदीर्घकाष्ठंतस्यलंबुकःतदग्रेनिबद्धोमृत्तिकास्तूपः।१५।मृष्यत्वार्यःपरिहासःखलुमयाकृतः।१६।तत्किंपुनरिदंनवमिवसंविधानकंवर्तते।एका
वर्णकंपिनष्टि।अपरासुमनसोगुंफति।इयंचपंचवर्णकुसुमोपहारशोभिताभूमी।१७।अद्यउपवासोगृहीतः।१८।किंनामधेयोऽयमुपवासः।१९।अभिरूपपतिर्ना
म।२०।आर्येइहलौकिकोऽथवापारलौकिकः।२१।आर्यपारलौकिकः।२२।प्रेक्षंतांप्रेक्षंतामार्यमिश्राःमदीयेनभक्तपरिव्ययेनपारलौकिकोभर्तान्विष्यते।२३।आर्येप्रसी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेव मम जन्मान्तरेपि भर्ता भविष्यसीत्युपोषितास्मि ।२३। अथायमुपवासः केनोपदिष्टः ।२४। आर्यस्यैव प्रियवयस्येन चूर्णवृद्धेन ।२५। आः ।आक्षेपे। दास्याःपुत्र चूर्ण
वृद्धक यदा ननु खलु त्वां कुपितेन राज्ञा पालकेन गृह्यमानं प्रेक्षिष्ये नववधूकेशकलापमिव ससुगंधं ।२६। असी दासार्यः। ननु आर्यस्यैव पारलौकिकोयमुपवासो नुष्ठीय
त इति ।२७। आर्ये उत्तिष्ठ २ कथय २ अत्र उपवासकेन कार्यं ।२८। अस्मादृशजनयोग्येन ब्राह्मणेनोपनिमंत्रितेन ।२९। तेन हि गच्छत्वार्यः। अहमपि अस्मादृशजनयोग्यं ब्रा
ह्मणमुपनिमंत्रयामि ।३०। यदार्याज्ञापयति ।३१। तस्मान्मैत्रेयौ कुथ्थे ईदृश्यामुज्जयिन्यां समृद्धायामस्मादृशजनयोग्यो ब्राह्मणोन्वेषितव्यः। एष चारुदत्तस्य मित्रं
मैत्रेयः इत एवागच्छति। भवतु प्रक्ष्यामि तावत्। आर्य मैत्रेय अस्माकं गेहे अग्रतुं अग्रणी भवत्वार्यः ।३२। भोः अन्यं ब्राह्मणमुपनिमंत्रयतु भवान्। व्यापृतोहमिदानीं ।३३।
आर्य संपन्नं भोजनं निःसपत्नं च। विपर्यस्तस्याभावात्। अपि च दक्षिणा कापि ते भविष्यति ।३४। भो यदिदानीं प्रत्यादिष्टोसि तत्किमिदानीं ते निर्बंधो मम मामपदेष्टामनुसर्तुं ।३५।
प्रत्यादिष्टोस्मि अनेन। भवतु। अन्यं ब्राह्मणमुपनिमंत्रयामि ।३६। मया मैत्रेयेण परस्य आमंत्रणानि भक्षितव्यानि। हा अवस्थे तुलयसि। य इदानीमहं तत्र भवतः
चारुदत्तस्य ऋद्ध्या अहोरात्रं प्रयत्नसिद्धैः उद्गारसुरभिगंधिभिर्मोदकैरेवाशितः। अभ्यंतर खलुः शालके द्वारे उपविष्टः मल्लकशतपरिवृतः चित्रकर इवांगुली
भिः स्पृष्ट्वा अपनयामि। नगरचत्वरवृषभ इव रोमंथायमानस्तिष्ठामि। स इदानीमहं तस्य दरिद्रतया यत्र कुत्रापि चरित्वा गेहपारावत इवावासनिमित्तमागा
गच्छामि। एष चारुदत्तस्य प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितोऽनुप्रेषितः प्रावारकः सिद्धीकृतदेवकार्यस्य आर्यचारुदत्तस्योपनेतव्य इति। तद्यावदार्य
चारुदत्तं पश्यामि। एष चारुदत्तः सिद्धीकृतदेवकार्यः गृहदेवतानां बलिं कुर्वन्नित एवागच्छति ।३७। एष आर्यचारुदत्तः तद्यावत्सांप्रतमुपसर्पामि। स्वस्ति भवते
वर्धतां भवान् ।३८। यद्भवानाज्ञापयति। भो वयस्य एष ते प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकः अनुप्रेषितः सिद्धीकृतदेवकार्यस्य आर्यचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृ.छ.ना.छा. रुदन्तस्य त्वयोपनेतव्य इति।३९। भो किमिदं चिंत्यते।४०। भो वयस्य मरणाद्दारिद्र्याद्वा कतरद्रोचते।४१। भो वयस्य अलं संतापितेन प्रणयिजनसंक्रामितविभवस्य सु
॥२॥ रजनपीतशेषस्य प्रतिपच्चंद्रस्येव परिक्षयोपि तेऽधिकतरं रमणीयः।४२। एते खलु दासीपुत्राः अर्थरूपप्रातसत्राः वरटाभीता इव गोपालदारका अरण्ये यत्र
नखादंति तत्र तत्र गच्छंति।४३। भो वयस्य तमेव अर्थकल्यवर्तं स्मृत्वाऽलं संतापितेन।४४। न गमिष्यामि।४५। यत एवं पूज्यमाना अपि न ते प्रसीदंति तत्को गुणो अ
भो तेषु देवेषु।४६। न गमिष्यामि अन्यः कोपि प्रयुज्यतां। मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति। आदर्शगतेव छाया वामतो दक्षिणा दक्षिणतो वामा। अ
न्यच्च। एतस्यां प्रदोषवेलायां इह राजमार्गे गणिका विटाश्चेटाश्च राजवल्लभाः पुरुषाः संचरंति तस्मान्मंडूकलुब्धस्येव कालसर्पस्य अभिमुखापतितो मूष
क इव वध्य इदानीं भविष्यामि। त्वं इह उपविष्टः किं करिष्यसि।४७। तिष्ठ वसंतसेनिके तिष्ठ किं यासि धावसि पलायसे प्रस्खलंती वासु प्रसीद न मरिष्यसि ति
ष्ठ तावत्। कामेन दह्यते खलु मे हृदयं तपस्वि अंगारराशिपतितं इव मांसखंडं।४८। आर्यके तिष्ठ २। उत्त्रासिता गच्छसि अंतिकात् मम रूपूर्णपुच्छेव ग्रीष्ममयू
संध्न मम आगच्छति स्वामीभट्टारको मम वने गतः कुक्कुरशावक इव।४९। तिष्ठ २। मम मदनमनंगं मन्मथं वर्धयंती निशि च शयनीये मे निद्रां प्रक्षिपंती। प्रसर
मयभीता प्रस्खलंती स्खलंती मम वशं अनुयाता रावणस्येव कुंती।५०। ज्ञावांकटंकानां मोषिका मस्यता ऽनी मत्स्यप्रक्षिका नर्तकी निम्ननासिका वंशगणान्वि
अनायत्ता कामस्य पानविशेषः। एषा वेशवधू वेशस्य वेश्या जनाश्रयस्य वधूः सुवेशानां लक्षणानां आश्रयः वेश्याऽस्याः अस्तीति वेशिका एतान्यस्या स्नाना
नि मया कृतानि अद्यापि मां नेच्छति।५१। बाणस्पर्शमिति विकृष्टलक्षणशब्दमिश्रं किं द्रौपदी इव पलायसे राममभीता। एष हरामि झटिति यथा हनूमान् वि
वसोर्भगिनीमिव तां सुभद्रां।५२। एमयराजवल्लभेन ततः खादिष्यसि मत्स्यमांसकं। एताभ्यां मत्स्यमांसाभ्यां कुक्कुराः मृतं न सेवंते।५३। अस्माभिः श्री अर्भ

4

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सार्यमाणा वनेश्रृगालीव कुक्कुरैः ॥ पलायसे नीघ्रं त्वरितं सवेगं सम्भ्रलक्ष्यं धंमम हृदयं हरंती ।५४। पल्लविके२ परभृतिके२ ।५५। हे विद्वन् मनुष्याः२ ।५६। माधविके२ ।५७। विद्वन्२ स्त्रियम
न्विच्छति ।५८। स्त्रीशांभ्रातं हन्मि मल्ले नाहं ।५९। हा धिक्२ कथं परिजनोपि परिभ्रष्टः । अत्र मयात्मा स्वयमेव रक्षितव्यः ।६०। वसंतसेनिके विलप२ परभृतिकां वा पल्लविकां वा सर्वं वा वसं
तमासं मया अभिसार्यमाणां त्वां कः परित्रायिष्यते । किं भीमसेनो जामदग्निपुत्रः कुंतीसुतो वा दशकंधरो वा । एषोहं केशपाशं गृहीत्वा दुःशासनस्यानुकृतिं करोमि । ननु प्रेक्षस्व२ असिः सु
तीक्ष्णः वलितं च मस्तकं छिनत्ति नीर्घं उत मारयामि वा । अलं तवैतेन पलायितेन मुमूर्षुर्यो भवति न स खलु जीवति ।६१। आर्य अबला खल्वहं ।६२। अत एव न मार्यसे ।६३। कथं अनु
नयोप्यस्य भयमुत्पादयति भवतु एवं तावत् । आर्य अस्मात्किमपि अलंकरणं तर्क्यते ।६४। तत्किं खलु विदानीं ।६५। अहं देवपुरुषः मनुष्यः वासुदेवः कामयितव्यः ।६६। शांतं२ अपेहि
अनार्यं मंत्रयसि ।६७। विद्वन्२ प्रेक्षस्व तावत् मां अंतरेण सुस्निग्धा एषा गणिकादारिका ननु येन मां भणति एहि श्रांतोसि क्लांतोसीति । अहं न ग्रामांतरं न गतेन रातरं वा गतः । भट्टालि
के शपामि विटस्य शीर्षेण आत्मीयाभ्यां पादाभ्यां तवैव पृष्ठानुपृष्ठिकया उद्भ्राम्यन् श्रांतः क्लांतोस्मि संवृत्तः ।६८। गुणः खलु अनुरागस्य कारणं न पुनर्बलात्कारः ।६९। एषा गर्भदा
सीकामदेवायतनोद्यानात् प्रभृति तस्य दरिद्रचारुदत्तस्य अनुरक्ता न मां कामयते वामतस्तस्य गृहं । यथा तव मम हस्तात् न एषा भ्रश्यति तथा करोतु भावः ।७०। बाढं वामत
स्तस्य गृहं ।७१। आश्चर्यं वामतस्तस्य गृहमिति यत्सत्यं अपराध्यतापि दुर्जनेन उपकृतं येन प्रियसंगमं प्रापिता ।७२। भाव२ बलवति अंधकारे माषराशिप्रविष्टेव मसीगुटि
का दृश्यमानैव प्रणष्टा वसंतसेना ।७३। भाव२ अन्वेषयामि वसंतसेनिकां ।७४। भाव२ किमिव ।७५। शृणोमि माल्यगंधं अंधकारपूरितया पुनर्नासिकया सुव्यक्तं पुनर्नप
श्यामि भूषणशब्दं ।७६। आश्चर्यं भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत् जानामि च संयोगेन गेहस्य संवृत्तं पक्षद्वारकं ।७७। भो न गमिष्यामि ।७८। भाव यस्य यदि
मया गंतव्यं तस्मादेषापि मम सहायिनी रदनिका भवतु ।७९। यत् आर्य आज्ञापयति ।८०। भवति रदनिके गृहाण बलिं प्रदीपं च अपावृत्तं पक्षद्वारकं करोमि ।८१। मम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छ॰भा॰घा॰ अभ्युपपत्तिनिमित्तं अपावृतपक्षद्वारकं। तद्यावत्प्रविशामि। हाधिक२ कथं प्रदीपः।८३। अपावृतपक्षद्वारेण पिंडीकृतेन वातेन निर्वापितः प्रदीपः। भवति रदनिके निष्क्रम त्वंप
॥३॥ द्वारकेण अहमपि अभ्यंतरचतुःशालके प्रदीपं प्रज्वाल्यागच्छामि।८४। भाव२ अन्वेषयामि वसंतसेनां।८५। भाव२ गृहीता२।८६। इतस्तावद्वर्तुलाए कांते भावास्तिष्ठतु भाव गृही
।८६। भट्टारक नैवेदोहं।८७। इतो भाव२ इतश्चेटः भावश्चेटश्चेटो भावः एवं तावदेकांते तिष्ठतं। भाव सांप्रतं गृहीता वसंतसेनिका। अंधकारे पलायमाना माल्यगंधेन सूचिता। केश
देपरामृष्टा चाणक्येनेव द्रौपदी।८८। एषासि बालाग्निरसि गृहीता केशेषु वालेषु शिरोरुहेषु। क्रोश क्रोश विक्रोश वा लप्स्यसे चंडं शंभुं शिवं शंकरं भास्वरं वा।८९। किं आर्यमिश्रै
वसितं।९०। भाव२ यथा दधिभक्तलुब्धायाः मार्जारिकायाः स्वरपरिवृत्तिर्भवति तथा दास्याः स्वरपरिवृत्तिः कृता।९१। आश्चर्यं। भोः प्रदोषमंदमारुतेन पशुबंधोपनीतस्य
छगलस्य हृदयं फुरफुरायते प्रदीपः। भो रदनिके।९२। भाव२ मनुष्यः२।९३। युक्तं नेदं सदृशं नेदं यदार्यचारुदत्तस्य दरिद्रतया सांप्रतं परपुरुषा गेहं प्रवेक्ष्यंते।९४। आर्यमैत्रे
प्रेक्षस्व मे परिभवं।९५। किं तव परिभवः अथवा अस्माकं।९६। ननु युष्माकमेव।९७। किमेष बलात्कारः।९८। बाढं।९९। सत्यं।१००। सत्यं।१। माता वत्स भोः स्वके गेहे कुक्कुरो
चंडो भवति किं पुनरहं ब्राह्मणः। ततरे तेनास्माद्दृशजनभागधेयकुटिलेन दंडकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टयिष्यामि।२। नात्र एष अपराध्यति।
एष खल्वात्रापराध्यति। अरेरे राजश्यालक संस्थानक दुर्जन दुर्मनुष्य युक्तं नेदं यद्यपि नाम तत्र भवान् आर्यचारुदत्तो दरिद्रः संवृत्तः तत्किं तस्य गुणैर्नालंकृता उज्जयि
नी येन तस्य गृहं प्रविश्य परिजनस्येदृश उपमर्दः क्रियते। मा दुर्गत इति परिभवो नास्ति कृतांतस्य दुर्गतो नाम। चारित्र्येण विहीन आढ्योऽपि च दुर्गतो भवति।३। किमि
सत्पुरुष उत्तिष्ठ२ अज्ञानता मया त्वमुपालब्धः सांप्रतं पुनर्ज्ञात्वा अनुनयामि।५। क्षणतु भवान्।६। न कथयिष्यामि।७। किंनिमित्तं पुनर्भाव एतस्य दुष्टबटुकस्य विन
जलिं कृत्वा पादयोर्निपतितः।८। कस्मात्वं भीतः।९। केह वत तस्य गुणा यस्य गृहं प्रविश्य सोत्कर्षमपि नास्ति।१०। कः स गर्भदासो गर्भदास्याः पुत्रः। शूरो विक्रांतः पांडवः श्वेतके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रोराधायाः रावणइंद्रदत्तः। आहोकुंत्यास्तेनरामेणजातः अश्वत्थामाधर्मपुत्रोजटायुः।११। अगृहीतावसंतसेनां।१२। कथमिव।१३। अगृहीतावसंतसेनांनगमिष्यामि।१४। यदि
छसिगच्छत्वंअहंनगमिष्यामि।१५। गतःखलुभावोदृष्टनं।१६। अरेकाकपदशीर्षमस्तकादुष्टबटुका उपविशत २।१७। उपविष्टाएववयं।१८। केन।१९। कृतांतेन।२०। उत्तिष्ठ।२१। उत्था
स्यामि।२२। कदा।२३। यदापुनरपिदेवमनुकूलंभविष्यति।२४। अरे रोदिहि २।२५। रोदिताएववयं।२६। केन।२७। दुर्गत्या।२८। अरेहस २।२९। हसिष्यामः।३०। कदा।३१। पुनरपिऋद्ध्या
चारुदत्तस्य।३२। अरेरे दुष्टबटुक भणिष्यसिममवचनेनत्वंदरिद्रचारुदत्तं। एषाससुवर्णसहिरण्यानवनाटकदर्शनोत्थितासूत्रधारिणीववसंतसेनागणिकादारिकाकाम
देवायतनोद्यानात्प्रभृतित्वामनुरक्ताअस्माभिर्बलात्कारानुनीयमानानवगेहंप्रविष्टातद्यदिमहस्तेस्वयमेवप्रस्थाप्यएनांसमर्पयसितदाधिकरणेव्यवहारंविनाशीघ्रं
निर्यातयतस्तवमयानुबद्धाप्रीतिर्भविष्यति। अथवाअनिर्यातयतआमरणांतिकंवैरंभविष्यति। अपिचप्रेक्षस्व २। कूष्मांडीगोमयलिप्तवृंताशाकंचशुष्कंतलितंखलु
मांसं। भक्तंचहेमंतिकरात्रिसिद्धंलीनायांचवेलायांनखलुभवतिपूतिः। शोभनंभणिष्यसिलघुकंभणिष्यसितथाभणिष्यसियथाहमात्मनःकेलिकायांप्रासादबाल
ल्लाग्रकपोतपालिकायामुपविष्टःशृणोमि। अन्यथायदिनभणसितदाकपाटतलप्रविष्टंकपित्थगुलिकमिवमस्तकंतेमडमडइतिचूर्णयिष्यामि।३३। भणिष्यामि।३४।
हेचेट गतःसत्यमेवभावः।३५। बाढं।३६। तच्छीघ्रमपक्रमावः।३७। तद्गृहाणवुभ्रहारकोसिं।३८। तवैवहस्तेतिष्ठतु।३९। एषभट्टारकस्वामिकःगृह्णातेनंभट्टारकोऽसिं।४०
निर्वल्कलंमूलकवर्णस्कंधेनगृहीत्वाचकोषसन्नं। कुक्कुरैःकुक्कुरीभिश्चबुक्कमानोयथाशृगालःशरणंप्रयामि।४१। भोरदनिकेनखलुतेऽयमपमानःतत्रभवतश्चा
रुदत्तस्यनिवेदयितव्यःदौर्गत्यपीडितस्यमन्येद्विगुणतरापीडाभविष्यति।४२। आर्यमैत्रेयरदनिकाखल्वहंसंयतमुखी।४३। एवमेव।४४। कथंपरिजनइतिमामवगच्छ
ति। आश्चर्यं। जातीकुसुमवासितःप्रावारकः अनुदासीनंअस्ययौवनंप्रतिभासते।४५। मंदभागिनीखल्वहंतवाभ्यंतरस्य।४६। भोइयंसारदनिका।४७। ननुकुपिता।४८।

न५ ४९

-सा-घा भोः अलंपरकलत्रदर्शनशंकया। एषा वसंतसेना कामदेवायतनोद्यानात्प्रभृति तामनुरक्ता ।४७। भो वयस्य एषा खलु राजश्यालोपि...ति ४८। एषा सा सुवर्णेति बलात्कारानुनीयमाना ह
॥४॥ नियतस्त्वं अलंकृतासि रतेरस्मरे ५० तद्यदि मम हस्तेन स्वयमेव प्रस्थाप्येनां समर्पयसीति ५१ एतेनानुचितभूमिकारोहणेनापराद्धोऽहं शीर्षेण प्रणम्य प्रसादयामि ।५
म३ भो द्वावपि युवां सुरवं प्रणम्य कलंकेदारो अन्योन्यं शीर्षेण शीर्षं समागतौ। अहमपि अमुनाकरभजानुसदृशेन शीर्षेण द्वावपि युवां प्रसादयामि उत्तिष्ठतमिति ५२ च
रोमधुरः अयमुपन्यासः न युक्तमद्य दृष्टेनेहागतया मया प्रतिवासितुं भवतु एवं तावद्भणिष्ये। आर्य यदि एवं अहमार्यस्यानुग्रहवती तदिच्छामि अहं इमं अलंकारकं
यस्य गेहे निक्षेप्तुं अलंकारस्यानिमित्तं एते पापा अनुसरंति ५४ आर्य अलीकं पुरुषेषु न्यासाः निक्षिप्यंते न पुनर्गेहेषु ।५५। अनुगृहीतास्मि ।५६। स्वस्ति भवत्यै ।५७। यद्येवं
तदा चौरैरपहियतामिति ।५८। एषोस्या अस्माकं विन्यासः ।५९। आर्य इच्छाम्यहं अनेन आर्येणानुगम्यमाना स्वकं गेहं गंतुं ।६०। त्वमेवैतां कलहंसगामिनीमनुगच्छ नूपु
जहंस इव शोभसे। अहं पुनर्ब्राह्मणोयं तत्र तत्र जनैश्चतुष्पथोपनीत इव उपहारः कुक्कुरैरिव खाद्यमानो विपत्स्ये ।६१। वर्धमानक प्रज्वालय प्रदीपिकाः ।६२। अरे तैले
विना प्रदीपिकाः प्रज्वाल्यंते ।६३। भो एताः खलु अस्माकं प्रदीपिका अवमानितनिर्धनकामुका इव गणिकाः निःस्नेहा इदानीं संवृत्ताः ।६४। यथा भवानाज्ञापयतीति ६
इति प्रथमोंकः ॥ मदना आर्यायाः सकाशं संदेशेन प्रेरितास्मि । तद्यावदार्यासकाशं गच्छामि । एषार्या हृदयेन किमप्यालिखंती तिष्ठति । तद्यावदुपसर्पामि ।१
हञ्जे चेटि ततस्ततः ।२। न किमपि मंत्रयसि किं ततस्ततः ।३। किं मया भणितं ।४। ततस्ततः इति ।५। आ एवं ।६। आर्ये माता आर्या आदिशति स्नाता भूत्वा देवतानां पूजां निव
र्तयेति ।७। चेटि विज्ञापय मातरं अद्य न स्नास्यामि तद्ब्राह्मण एव पूजां निर्वर्तयत्विति ।८। यदार्याज्ञापयति ।९। आर्ये स्नेहः पृच्छति न पुरोभागिता किं न्विदं ।१०। म
दनिके कीदृशीं मां प्रेक्षसे ।११। आर्यायाः शून्यहृदयत्वेन जानामि हृदयगतं कमप्यार्या अभिलषतीति ।१२। सुष्ठु त्वया ज्ञातं परहृदयग्रहणपंडिता मदनिका खलु त्वं ।१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दि९

प्रियंमेप्रियंकामः खलुनामैष भगवाननुगृहीतोमहोत्सवः तरुणजनस्यतत्कथयत्वार्या किंराजाराजवल्लभोवासेव्यते ।१४। चेटिरंतुमिच्छामिनसेवितुं ।१५। विद्याविशेषालंकृतः किं
कोपिब्राह्मणोयुवाकाम्यते ।१६। पूजनीयोमेब्राह्मणोजनः ।१७। किमनेकनगराभिगमनजनितविभवविस्तरोवाणिजयुवावाकाम्यते ।१८। चेटि उपारूढस्नेहमपिप्रणयिजनंपरित्य
र्देशांतरगमनेनवाणिजजनोमहद्वियोगजदुःखमुत्पादयति ।१९। आर्येनराजानराजवल्लभोनब्राह्मणोनवाणिजजनस्तत्कइदानींसः भर्तृदारिकयाकाम्यते ।२०। चेटित्वंमया
सहकामदेवायतनंगताआसीः ।२१। आर्येगतास्मि ।२२। तथापिमामुदासीनेवपृच्छसि ।२३। ज्ञातंकिंसएवयेनार्याशरणागताभ्युपपन्ना ।२४। किंनामधेयःखलुसः ।२५। सख
लुश्रेष्ठिचत्वरेप्रतिवसति ।२६। अयिनामास्यपृष्टासि ।२७। सखलुआर्येसुगृहीतनामधेयआर्यचारुदत्तोनाम ।२८। साधुमदनिकेसाधुसुष्ठुत्वयाज्ञातं ।२९। एवंतावत् आ
र्येदरिद्रः खलुसश्रूयते ।३०। अतएवकाम्यते । दरिद्रपुरुषसंक्रांतमनाः खलुगणिकालोकेअवचनीयाभवति ।३१। आर्येकिंहीनकुसुमंसहकारपादपंमधुकर्यः पुनःसेवं
ते ।३२। अतएवतामधुकर्यउच्यंते ।३३। आर्येयदिसमनीषितस्तत्किमर्थमिदानींसहसानाभिसार्यते ।३४। चेटिसहसाअभिसार्यमाणः प्रत्युपकारदुर्बलतयामातावज्जनोदु
र्लभदर्शनः पुनर्भविष्यति ।३५। किंअतएवसोऽलंकारस्तस्यहस्तेनिक्षिप्तः ।३६। चैसुष्ठुत्वयाज्ञातं ।३७। अरेभट्टारकदशसुवर्णस्यकृतेरुद्धः द्यूतकरः प्रपलायितः तद्गृहाण२
तिष्ठ२ दूरात्प्रदृष्टोसि ।३८। कष्टं । एषद्यूतकरभावः । आश्चर्यं । नवबंधनमुक्तयाइवगर्दभ्याहालाडितोस्मिगर्दभ्या । अंगराजमुक्तयाशक्त्याघटोत्कचइवघातितोस्मिशक्त्या ।
लेखकव्यापृतहृदयंसभिकंदृष्ट्वाझटितिप्रभ्रष्टः इदानींमार्गनिपतितः कंनुखलुशरणंप्रव्रजामि । तद्यावदेतौसभिकद्यूतकरौअन्यतोमांअन्विष्यतः तावदितोविपरीता
भ्यांपादाभ्यांएतच्छून्यंदेवकुलंप्रविश्यदेवीभविष्यामि ।३९। अरेभट्टारकदशसुवर्णस्यकृतेरुद्धः द्यूतकरः प्रपलायितः गृहाणतिष्ठ२ दूरात्प्रदृष्टोसि ।४०। यदिव्रजसिपाता
लंइंद्रंशरणंचसांप्रतंयासि । सभिकंवर्जयित्वाकोरुद्रोपिनरक्षितुंशक्नोति । ● । कुत्र२ सुसभिकविप्रलंभक पलायसेरेभयपरिवेपितांगक । पदे२ समविषमंस्खलन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृ·भा·छा· कुलंयशोऽतिक्लिष्टंकुर्वन् । ।एषव्रजतित्थ्यंप्रणष्टापदवी ।४१। अरेविप्रतीपौपादौप्रतिमाशून्यंदेवकुलंधूर्तोद्यूतकरोविप्रतीपपादाभ्यांदेवकुलंप्रविष्टः।४२। ततोनुसर
॥५॥ ।४३। एवंभवतु ।४४ कथंकाष्ठमयीप्रतिमा ।४५। अरेनखलुशैलप्रतिमा। एवंभवतु। एहिद्यूतेनक्रीडावः।४६। अरेकत्ताशब्दोनिर्णाणकस्यहरतिहृदयंमनुष्यस्यढक्काशब्दइ
नराधिपस्यप्रभ्रष्टराज्यस्य। । जानामिनक्रीडिष्यामिसुमेरुशिखरपतनसंनिभंद्यूतं तथापिखलुकोकिलमधुरःकत्ताशब्दोमनोहरति।४७। ममपाठः।४८। नखलुम
पाठः।४९। ननुममपाठः।५०। लब्धःपुरुषः।५१। अरेलुप्तदंडकगृहीतोसिप्रयच्छतद्दशसुवर्णं।५२। अद्यदास्यामि।५३। अधुनाप्रयच्छ।५४। दास्यामिप्रसादंकुरु।५५। अरेननुसं
प्रतंप्रयच्छ।५६। शिरःपतति।५७। एषत्वंखलुद्यूतकरमंडल्याबद्धोसि।५८। कथंद्यूतकरमंडल्याबद्धोस्मि। कष्टं। एषोस्माकंद्यूतकराणांअलंघनीयःसमयः तस्मात्कुतोदा
मि।६०। अरेगंडःकृतः।६१। एवंकरोमि अर्धंतुभ्यंददामि अर्धंमत्यंमुंचतु।६२। एवंभवतु।६३। अर्धस्यगंडंकरोमि अर्धमपिमत्यमार्योमुंचतु।६४। कोदोषः एवंभवतु।६५। आर्यअर्धं
त्वयामुक्तं।६६। मुक्तं।६७। अर्धंत्वयापिमुक्तं।६८। मुक्तं।६९। सांप्रतंगमिष्यामि।७०। प्रयच्छतद्दशसुवर्णंकुत्रगच्छसि।७१। प्रेक्षध्वं२भट्टारकाः। हासांप्रतमेवैकस्यार्धगंडःकृतः। अपर
र्धंमुक्तंतथापिमांअबलंसांप्रतंयाचते।७२। धूर्तोमाथुरोहंनिपुणोत्रनाहंधूर्तयामि ततःप्रयच्छतंलुप्तदंडकंसुवर्णसुवर्णंसांप्रतं ७३। कुतोदास्यामि ७४ पितरंविक्रीयप्रयच्छ।७५।
सेवट तोमेपिता।७६। मातरंविक्रीयप्रयच्छ।७७। कुतोमेमाता।७८। आत्मानंविक्रीयप्रयच्छ।७९। कुरुतप्रसादंनयतमांराजमार्गे।८०। प्रसर।८१। एवंभवतु। आर्याःक्रीणध्वंमामस्यसभिकस
हस्तात्दशभिःसुवर्णकैः। किंभणत किंकलहंकरिष्यसीति। गेहेतेकर्मकरोभविष्यामि। कथंअदत्वाप्रतिवचनंगतः। भवत्वेवमिममन्यंभणिष्यामि। कथमेषोपिमामवधीर्यग
तः। आर्यचारुदत्तस्यविभवेविघटितेएषोहंमंदभाग्यः।८२। ननुदेहि।८३। कुतोदास्यामि।८४। आर्याःपरित्रायत२।८५। कुतोदास्यामि।८६। अयंदशसुवर्णकंधारयति।८७। पक्ष
तः। जर्जरपटप्रावृतोयंपुरुषोदशसुवर्णकल्यवर्तंभणति।८८। नवदशसुवर्णकल्यवर्तःममेषविभवः।८९। नाल्किंभवतु।९०। अधनजयति।९१। अधनयुक्तंजल्पितुंएवंआचक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वंभयघ धूर्तक। अहमपि नाम माथुरो धूर्तः द्यूतं मिथ्या आदर्शयामि अन्यस्मै अहं न बिभेमि धूर्तः खंडितवृत्तोसि त्वं।११। त्वं खलु खंडितवृत्तः।१२। वेश्यापुत्र एवमेव द्यूतं त्वया
सेवितं।१३। अरे संवाहक प्रयच्छ त्वं दश सुवर्णं।१४। अद्य दास्यामि तावद्दास्यामि।५। अरे अरे दुष्टपुंश्चलीपुत्रक फलमपि प्राप्स्यसि।६। एव प्रेक्षिष्ये।७। एवं प्रेक्षिष्ये।८। एतत्कस्या
प्यपरावृतपक्षद्वारकं गेहं तदत्र प्रविशामि। आर्ये शरणागतोस्मि।९९। अभयं शरणागतस्य। हे चेटि पिधेहि पक्षद्वारकं।१००। कुतस्ते भयं।१। आर्ये धनिकात्।२। चेटि सांप्रतमपा
वृणु पक्षद्वारं।३। कथं धनिकात्तुलितं अस्यैव भयकारणं। सुष्ठु खल्वेवमुच्यते। यस्मात् बलं ज्ञात्वा भारं तुलितं वहति मनुष्यः तस्य स्खलनं न जायते न च कांतारगतो विपद्यते। अ
लक्षितोस्मि।५। अरे देहि २।५। महाया वदेववयं दर्दुरेण कलहायितास्तावदेवस पुरुषोपक्रांतः।७। तस्य द्यूतकरमुष्टिप्रहारेण नासिका भग्ना। एहि रुधिरपथमनुसरामः
।८। सदा वसंतसेनागृहं प्रविष्टः सः।९। सत्तानि सुवर्णानि। राजकुलं गत्वा निवेदयावः।१०। एष धूर्तः अतो निष्क्रम्य अन्यत्र गमिष्यति तस्मादुपरोधेनैव गृह्णीमः।११। कुतश्चा
र्यः को वा आर्यः कस्य वा आर्यः किं वा वृत्तिमार्य उपजीवति कुतो वा भयं।१२। शृणोतु आर्या। आर्ये पाटलिपुत्रं मे जन्मभूमिः गृहपतिदारकोहं संवाहकस्य वृत्तिं अंगमर्दनरूपां उप
जीवामि।१३। सुकुमारा खलु कला शिक्षिता आर्येण।१४। आर्ये कलेति शिक्षिता आजीविका इदानीं संवृत्ता।१५। अतिनिर्विण्णमार्येण प्रतिवचनं दत्तं ततस्ततः।१६। ततः आर्ये एष
निजगृहे आहिंडिकानां मुखाच्छ्रुत्वा अपूर्वदेशदर्शनकुतूहलेन इहागतः। इहापि मया प्रविश्य उज्जयिनीं ए आर्यः शुश्रूषितः यस्तादृशः प्रियदर्शनः प्रियवादी दयि
तं न कीर्तयति अपकृतं विस्मरति। किं बहुनोक्तेन दक्षिणतया फलकृतं इव आत्मानं मन्यते शरणागतवत्सलश्च।१७। क इदानीमार्याया मनोरथानां तस्य गुणांश्चोरयित्वा उ
ज्जयिनीमलंकरोति।१८। साधु चेटि साधु मयापि एवमेव हृदयेन मंत्रितं।१९। आर्य ततस्ततः।२०। आर्ये स इदानीमनुक्रोशात् तैः प्रदानैः।२१। किमुपरतविभवः संवृत्तः।२२। अना
ख्यातमेव कथमार्यया विज्ञातं।२३। किमत्र ज्ञातव्यं दुर्लभाः गुणा विभवाश्च। अपेयेषु तडागेषु बहुतरमुदकं भवति।२४। आर्य किं नामधेयः खलु सः।२५। आर्ये क इदानीं तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृ·भा·छा· एतेन लम्भं गां कस्य नाम न जानाति स खलु श्रेष्ठिचत्वरे प्रतिवसति श्लाघनीयनामधेय आर्यचारुदत्तो नाम ।२६। आर्यस्यास्य कतमेतेऽहं हो चेटि देस्य स्यासनं तालवृंतं कंटहाणपा
॥६॥ मस्यार्यस्य बाधते ।२७। कथमार्यचारुदत्तस्य नामसंकीर्तनेन द्वारोमे स्मारकः । साधु आर्य चारुदत्त साधु पृथिव्यां त्वमेको जीवसि शेषः पुनर्जनः श्वसिति । स वतु आर्यः स वतु आर
निसादत्तुमार्या ।२८। आर्यः कुतः स धनिकः ।२९। सत्कारधनः खलु सज्जनः कस्य न भवति चलाचलं धनं । यः पूजितुमपि जानाति स पूजाविशेषमपि जानाति ।३०। ततः ।३१।
स्तेन आर्येण सवृत्तिः परिचारकः कृतोऽस्मि । चारित्र्यावशेषे चतास्मि द्यूतोपजीवी संवृत्तः । ततो भागधेयविषमतया दशसुवर्णं द्यूते हारितं ।३२। उत्खातितोऽस्मि मुषितो
।३३। एतौ तौ सभिकद्यूतकरौ मामनुसंधत्तः सांप्रतं श्रुत्वा आर्या प्रमाणं ।३४। मदनिके वासपादपविसंस्थुलतया पक्षिणोपि इतस्ततो आहिंडंति । हे चेटि तरूष्य एतयोः स
कद्यूतकरयोः अयमार्य एव प्रतिपादयतीति इदं हस्ताभरणं त्वं देहि ।३५। यदार्याज्ञापयति ।३६। उत्साहितोऽस्मि मुषितोऽस्मि ।३७। यथा एतौ ऊर्ध्वं प्रेक्षेते दीर्घं निश्वसत आक्वार
तश्च अभिलषतश्च द्वारनिहितलोचनौ तथा तर्कयामि एतौ तौ सभिकद्यूतकरौ भविष्यतः । आर्य वंदे ।३८। सुखं तव स्वागतं ।३९। आर्य कतरो युष्माकं सभिकः ।४०। कस्य त्वं त
ध्येष्माधरेण रतदृष्ट दुर्विनीतेन । जल्पसि मनोहरवचनं आलोकयंती कटाक्षेण । नास्ति मम विभवः अन्यत्र व्रज ।४१। यदि ईदृश आनिन तु मंत्रयसि नैव वासि द्यूतकरः ।
स्तिकोपि युष्माकं धारकः ।४२। अस्ति दशसुवर्णं धारयति किं तस्य ।४३। तस्य कारणादार्ये इदं हस्ताभरणं प्रतिपादयति नहि नहि स एव प्रतिपादयति ।४४। अरे भणालितं कु
पुत्रं स्फुतस्तवगंडः आगच्छ पुनर्द्यूतं रमस्व ।४५। आर्ये परितुष्टौ गतौ सभिकौ ।४६। तद्गच्छतु आर्या बंधुजनं समाश्वासयितुं ।४७। आर्ये यदि एवं तत इयं कलापरिजन
द्यूतक ४ गता क्रियतां ।४८। आर्यस्य कारणादियं कला शिक्ष्यते स एव आर्येण शुश्रूषितपूर्वः शुश्रूषितव्यः ।४९। आर्यया निपुणं प्रसादितोऽस्मि । कथं प्रत्युपकरिष्ये । आर्ये हिंएं
द्यूतकरावमानेन शाक्यश्रमणको भविष्यामि । ततः संवाहको द्यूतकरः शाक्यश्रमणकः संवृत्तः इति स्मर्तव्यानि आर्यया एतान्यक्षराणि ।५०। आर्ये अलं साहसेन ।५१। आर्ये कृ
निश्चयः । द्यूतेन तत्कृतं मम यद्विहस्तं जनस्य सर्वस्य । इदानीं प्रकटशीर्षो नरेंद्रमार्गेण विहरिष्यामि ।५२। अरे किं नेदं कुंसणत एष खलु वसंतसेनाया आपानं स्तंभंजको नाम दु

ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्तीविहरतीति। अहोआर्यायागंधगजंप्रेक्षिष्ये गत्वाअथवाकिंममएतेनयथाध्यवसितमनुष्ठास्यामि।५३। कुत्र२ आर्या ५४। दुर्मनुष्यकिंतेउद्वेगकारणं। यद्यत्रेऽवस्थितामार्यान
प्रेक्षसे ५५ आर्येवंदे ५६। कर्णपूरकपरितुष्टमुखोलक्ष्यसेतत्किंनेदं ५७। आर्येवंचितासियया अद्यकर्णपूरकस्यपराक्रमोनदृष्टः ।५८। कर्ण० किं ।५९। शृणोतुआर्या। यःसआर्यायाःस्तं
भभंजकोनामदुष्टहस्तीसआलानस्तंभंभंक्त्वामहामात्रंव्यापाद्यमहांतंसंक्षोभंकुर्वन्राजमार्गमवतीर्णः ततःअत्रांतरेउद्घुष्टंजनेन। अपनयतबालकजनंत्वरितमारोहतवृक्ष
प्रासादं। किंनखलुप्रेक्षध्वंपुरतोदुष्टोहस्तीइतएति। अपिच। विचरतिनूपुरयुगलंछिद्यंतेमेखलामणिखचिताः। वलयाश्चसुंदरतरारत्नांकुरजालप्रतिबद्धा। ततस्तेनदुष्टहस्ति
नाकरचरणदंतैःफुल्लनलिनीमिवनगरीमुज्जयिनीमवगाहमानेनसमासादितःपरिव्राजकः। तंचपरिभ्रष्टदंडकुंडिकाभाजनंशीकरैःसिक्त्वादंतांतरेक्षिप्तंप्रेक्ष्यपुनरप्यु
द्घुष्टंजनेनहापरिव्राजकोव्यापाद्यतइति।६०। अहोप्रमादः२ ६१। अलंसंभ्रमेणशृणोतुतावदार्या। ततोविच्छिन्नविसंष्ठुलभ्रष्टशृंखलाकलापंउद्वहंतंदंतांतरपरिगृहीतंपरिव्राजकमु
द्वहंतंतंप्रेक्ष्यकर्णपूरकेणमयानहि२ आर्यायाअन्नपिंडोपपुष्टेनदासेनवामचरणेनद्यूतलेखकंउद्घुष्य२ त्वरितमापणाल्लोहदंडंगृहीत्वाआकारितःसदुष्टहस्ती ।६२। तत
स्ततः ।६३। आहत्यसरोषंतंहस्तिनंविंध्यशैलशिखराभं। मोचितोमयासदंतांतरसंस्थितःपरिव्राजकः ।६४। सुष्ठुत्वयाकृतं ।६५। ततआर्येसाधुरेकर्णपूरकसाधुइत्येतावन्मात्रं
भणंतीविषमभराक्रांतेवनौःसकलाउज्जयिनीआसीत्। ततआर्येएकेनशून्यानिआभरणस्थानानिपरामृश्यऊर्ध्वंप्रेक्ष्यदीर्घंनिश्वस्यअयंप्रावारकोमम
परिक्षिप्तः ।६६। कर्ण० जानीहितावत्किंएषजातीकुसुमवासितःप्रावारकोनवेति ।६७। आर्येमदगंधेनसुष्ठुतंगंधंनजानामि ।६८। नामापितावदस्यपश्य ।६९। इदंनामआर्यैववाच
यतु ।७०। कर्ण० शोभतेआर्यायाःप्रावारकः ।७१। आंग्रेम० ।७२। कर्ण० इदंतेपारितोषिकं।। सांप्रतंसुष्ठुशोभतेआर्यायाःप्रावारकः ।७३। कर्ण० एतस्यांवेलायांकुत्रआर्यचारु
दत्तः ।७४। एतेनैवमार्गेणप्रवृत्तोगेहं ।७५। हेचेटिउपरितनंअलिंदकमारुह्यआर्यचारुदत्तंपश्यामः ।७६॥ इतिद्वितीयोंकः॥ सुजनःखलुभृत्यानुकंपकःस्वामीनिर्धनकोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृ॰ भा॰ छा॰ न्शोभते।पिशुनःपुनर्द्रव्यगर्वितोदुष्करःखलुपरिणामदारुणः।सुजनःखलुकुष्टस्यपालकोधनहीनोऽप्यसुरपिशोभते।पिशुनःपुनर्द्रव्यगर्वितोनचलक्ष्मीनिभवावलंबितः।आ

॥८॥ च।सस्पलंयपटबलीवर्दोनशक्योवारयितुं।अन्यकलत्रप्रसक्तेन।द्यूतप्रसक्तमनुष्येण।योऽपिस्वाभाविकदोषेण।कापिवेलाआर्यचारुदत्तस्यगांजर्वंश्रोतुंगतस्यअतिक्रामति।

धीरजनीअद्यापिनागच्छति।तद्यावद्बहिर्द्वारशालायांगत्वास्वप्स्यामि।१।भोरहिल्लहंगधावः।२।ममतावद्धास्यामेवहास्यंजायते।स्त्रियासंस्कृतंपठंत्या।मनुष्येणचकाक

गायता।स्त्रीतावत्संस्कृतंपठंतीदत्तनवनासिकारंअरज्जुरिवगृष्टिःअधिकंसूसूशब्दंकरोति।मनुष्योऽपिकाकलींगायन्शुष्कसुमनोदामवेष्टितोवृद्धपुरोहितइवमंत्रंज

न्इदंमेनरोचते।३।भोवयस्यआपणांतररथ्याविभागेषुसुखंकुक्कुराःअपिसुप्ताःतद्गृहंगच्छावः।वयस्यपश्यपश्यएषोऽप्यंधकारस्यावकाशंददत्अंतरिक्षप्रासादादवतरतिभग

न्चंद्रः।४।भोइदमस्माकंगेहंवर्धमानकउद्घाटयद्वारं।५।आर्यमैत्रेयस्वरसंयोगःश्रूयतेआगतआर्यचारुदत्तः।तद्यावद्द्वारमस्यददामि।आर्यवंदे।मैत्रेयत्वामपिवंदे

अविस्तीर्णेआसनेनिसीदतमार्यौ।६।वर्धमानकरदनिकामाकारयपादौधावितुं।७।आर्यमैत्रेयअहंपानीयंगृण्हामित्वंपादौधाव।८।भोवयस्यएषइदानींदासीपुत्रोऽक्षत्वाप

नीयंगृण्हातिमांपुनर्ब्राह्मणंपादौधावयति।९।आर्यमै॰देहिउदकं।१०।किंममपादोदकेनार्द्रभूम्यामेवमयागर्दभेनेवपुनरपिलोटितव्यं।११।आर्यमै॰ब्राह्मणःखलुत्वं।१२।यथा

र्वनागानांमध्येडुंडुभस्तथासर्वब्राह्मणानांमध्येऽहंब्राह्मणः।१३।आर्यमै॰तथापिधावयिष्यामि।आर्यमै॰एतत्तत्सुवर्णभांडंममदिवातवरात्रौचतद्गृहाण।१४।अद्याप्येतत्ति

ति।किमत्रोज्जयिन्यांचौरोऽपिनास्ति।यस्तद्दास्याःपुत्रोनिद्राचौर्येणापहरति।भोवयस्यअभ्यंतरचतुःशालकंप्रवेशयाम्येनं।१५।अपिनिद्रातिभवान्।१५।तत्स्वपिवः।१६।

वयस्यसंधिरिवदृश्यतेचोरमिवपश्यामितद्गृहाणत्वमेवानिदंसुवर्णभांडं।१७।भोवयस्यशापितोऽसिगोब्राह्मणकाम्ययायद्येतत्सुवर्णभांडंनगृण्हासि।१८।भोवयस्यनीत

स्तेऽग्रहस्तः।१९।गृहीतं।२०।इदानींविक्रीतपण्यइववणिग्गहंसुखंस्वप्स्यामि।२१।हाधिक्२बहिर्द्वारशालायांप्रसुप्तोवर्धमानकःसोऽप्यत्रनदृश्यतेभवतुआर्यमैत्रेयमा

यामि।२२।हाधिक्२अस्माकंगृहेसंधिंकर्तयित्वाचौरोनिष्क्रामति।भवतुमैत्रेयंगत्वाप्रबोधयामि।आर्यमै॰उत्तिष्ठ२अस्माकंगेहेसंधिंकर्तयित्वाचौरोनिष्क्रांतः।२३।आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दास्याः पुत्रिके किं भणसि चोरः कल्पयित्वा संधिं निष्क्रांतः २४ हताश किं न अलं परिहासेन किं न प्रेक्षसे एतत् २५ आः हं० द्वितीयमिव द्वारमुद्घाटितमिति । भो वयस्य चारुदत्त उत्तिष्ठ अ
स्माकं गेहे संधिं दत्त्वा चोरो निष्क्रांतः २६ भो न परिहासः प्रेक्षतां भवान् २७ भो एषः २८ भो० एष संधिः द्वितीयमिव दत्तो भवेत् । अथवा आगंतुकेन शिक्षितुकामेन वा अन्यथा अत्र उज्जयि
न्यां को अस्माकं गृहं विभवं न जानाति २९ भो कथं तत्र भवतो चोरस्य कृते अनुशोचामि । तेन चिंतितं महद्गृहं इतो रत्नभांडं सुवर्णभांडं वा निष्क्रामयिष्यामि । कुत्र तत्सुवर्णभांडकं । भो व० त्वं
सर्वकालं भणसि मूर्खो मैत्रेय अपंडितो मैत्रेय इति । सुष्ठु कृतं मया तत्सुवर्णभांडं भवतो हस्ते समर्पयता अन्यथा दास्याः पुत्रेणापहृतं भवेत् ३० भो यथा नाम अहं मूर्खस्तत्किं
परिहासस्यापि देशकालं न जानामि ३१ भो यदा त्वं मया भणितोसि शीतलस्ते अग्रहस्तः ३२ किं नापहृतं ३३ तथापि किं प्रियं ३४ न्यासः खलु सः ३५ समाश्वसितु भवान् दरिद्रा
स चोरेणापहृतस्त्वमपि किं मोहमुपगतः ३६ अहं खलु अपलपिष्यामि केन दत्तं केन गृहीतं को वा साक्षीति ३७ तावदार्यायै धूतायै गत्वा निवेदयामि ३८ अयि सत्यं अपरिक्षतशरी
रः आर्यपुत्रः आर्यमैत्रेयेण सह ३९ स्वामिनि सत्यं किंतु यः सवेश्याजनस्यालंकारः सोऽपहृतः ४० समाश्वसितु आर्या धूता ४१ चेटि किं भणसि अपरिक्षतशरीर आर्यपुत्र इति ।
वरमिदानीं स शरीरेण परिक्षतो न पुनश्चारित्रेण । सांप्रतमुज्जयिन्यां जन एवं मंत्रयिष्यति । दरिद्रतया आर्यपुत्रेणैवेदृशमकार्यमनुष्ठितं । भगवन् कृतांत पुष्करपत्रपतित
जलबिंदुचंचलैः क्रीडसि दरिद्रपुरुषभागधेयैः । इयं च मे एका मातृगृहलब्धा रत्नावली तिष्ठति । एतामप्यतिशौंडीरतया आर्यपुत्रो न ग्रहीष्यति । चेटि आर्यमैत्रेयं तावदाह्व
य ४२ यदार्या धूता आज्ञापयति । आर्यमै० धूता त्वामाज्ञापयति ४३ कुत्र सा ४४ एषा तिष्ठति उपसर्प ४५ स्वस्ति भवत्याः ४६ आर्य वंदे । आर्य पुरस्तान्मुखो भव ४७ एष भवति पु
रस्तान्मुखः संवृत्तः ४८ आर्य गृहाणेमां ४९ किं न्विदं ५० अहं खलु रत्नषष्ठीमुपोषितासं तत्र यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहयितव्यः सोऽन्यत्र प्रतिग्राहितः तत्तस्य कृते प्र
तीच्छेमां रत्नमालिकां ५१ स्वस्ति गमिष्यामि प्रियवयस्यस्य निवेदयामि ५२ आर्यमैत्रेय मा खलु मां लज्जितां कुरु ५३ अहो अस्या महानुभावता ५४ एषोस्मि गृह्णेतां ५५ भो
यत्ते सद्भावं सारसंग्रहस्य फलं ५६ मा तावद् रवादितस्यापुत्रस्याल्पमूल्यस्य चोरैरपहृतस्य कारणात् चतुःसमुद्रसारभूता रत्नावली दीयते ५७ भो दरिद्रः किं अकृपणं मंत्रयति ५८ ॥ तृ
तीयोंकः ॥ अथ चतुर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ प्रा॰ आज्ञप्तास्मि मात्रा आर्यायाः सकाशं गंतुं। एषा आर्या चित्रफलकनिषण्णदृष्टिर्मदनिकया सह किमपि मंत्रयंती तिष्ठति। तद्यावदुपसर्पामि।१। चेटि मदनिके सुसदृशी इयं चित्राकृतिः
॥६॥ आर्यचारुदत्तस्य।२। सुसदृशी।३। कथं त्वं जानासि।४। येनार्यायाः सुस्निग्धा दृष्टिरनुलग्ना।५। चेटि किं वेश्यावासदाक्षिण्येन मदनिके एवं भणसि।६। आर्ये किं य[illegible]नो वेश्याभि
वसति स एव अलीकदाक्षिण्यो भवति।७। चेटि नानापुरुषसंगेन वेश्याजनः अलीकदाक्षिण्यो भवति।८। यतस्तावदार्याया दृष्टिरियमभिरमते हृदयं च तस्य कारणं किं पृच्छ्यते।९
चेटि सखीजनमप्युपहसनीयतां द्रक्ष्यामि।१०। आर्ये एवं न्विदं सखीजनचित्तानुवर्ति अबलाजनो भवति।११। आर्ये माता आज्ञापयति गृहीतावगुंठनं पक्षद्वारे सज्जं प्रवहणं तद्गच्छेति
चेटि किं आर्यचारुदत्तो मां नेष्यति।१३। आर्ये येन प्रवहणेन सह सुवर्णदशसाहस्रिकः अलंकारोऽनुप्रेषितः।१४। कः पुनः सः।१५। एष एव राजश्यालकः संस्थानः।१६। अपेहि मा पुनरेवं
भणिष्यसि।१७। प्रसीदतु २ आर्या संदेशेनास्मि प्रेषिता।१८। अहं संदेशस्यैव कुप्यामि।१९। तत्किमिति मातरं विज्ञापयिष्यामि।२०। एवं विज्ञापयितव्या यदि मां जीवंतीमिच्छसि तदा एवं
पुनरहं मात्रा आज्ञापयितव्या।२१। यथा ते रोचते।२२। चेटि इमं तावच्चित्रफलकं मम शयनीये स्थापयित्वा तालवृंतं गृहीत्वा लघु आगच्छ।२३। यदार्याज्ञापयति।२४। कथं श
लकः। शर्विलक स्वागतं ते कुत्र त्वं।२५। चिरयति मदनिका तत्कुत्र नु खलु सा। कथमेषा केनापि पुरुषकेण सह मंत्रयंती तिष्ठति। यथा अतिस्निग्धया निश्चलदृष्ट्या आपिबंती एवं
जि॰ ध्यायति। तथा तर्कयामि एष स जनः एनामिच्छति अभुजिष्यां कर्तुं तद्रमतां २ मा कस्यापि प्रीतिविघ्नो भवतु न खलु आकारयिष्यामि।२६। शर्विलक कथय।२७। शर्विलक किं नेदं सशंक
वलक्ष्यसे।२८। अथ किं।२९। कथं परमरहस्यं तत्त्वं श्रोष्यामि।३०। कथं मत्संबंधिनी कथा तच्छ्रोष्यामि अनेन गवाक्षेणान्तरितशरीरा।३१। शर्विलक भणिता मया आर्या तदा प
ति यदि मम स्वच्छंदः तदा विनार्थं च सर्वं परिजनमभुजिष्यं करिष्यामि। अथ न्वार्किं कुतस्ते एतावान् विभवः येन मामार्या [illegible] सकाशान्मोचयिष्यसि।३२। प्रसन्नास्या
साहसकर्मतया पुनरुद्वेजनीया।३३। नास्त्रीकल्पवर्तस्य कारणेन उभयमपि संशये विनिक्षिप्तं।३४। शरीरं चारित्र्यं च।३५। श॰ अखंडितचारित्रोऽसि। ननु हेलया मम कारणात्
हसं कुर्वता असंतविरुद्धमाचरितं।३६। श॰ अप्रकाशोऽलंकारः अयं च जनः इति हृदयमपि न युज्यते तत् उपनयता वसन्नयामि। तावदेतदलंकारं।३७। दृष्टपूर्व इवायमलंकार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३८

ड्डणकुतस्तेरथः ३७ यदिमेप्रत्ययंनगच्छसितत्किंनिमित्तंमांनिष्क्रीणासि ३९। साहसिकनखलुत्वयाममकारणादिदमकार्यंकुर्वतातस्मिन्गेहेकोपिव्यापादितःपरिक्षतोवा। ४० सत्यं ४१
आश्चर्यंत्वत्कृपजीवितास्मि ४२। प्रियं ४३। अहोअस्यास्थानेआवेगः ४४ आर्यअसंबद्धभाषकअसंभावनीयंकुप्यसि ४५ एषखलुअलंकारःआर्ययाकृतः ४६ सचतस्यआर्यस्यहस्तेवि
निक्षिप्तः ४७। एवमिव ४८ कथमेषसंताप्यतेएवतदजानताएतेनैवमनुष्ठितं ४९ अनलमिवपंडितः ५०। शर्विलिकयदिममवचनंश्रूयतेतत्तस्यैवमहानुभावस्यप्रतिनिर्यातय ५१ नवंदुहा
तयोभवति ५२। साधुमदनिकेसाधु ५३। सोयमपरउपायः ५४ कःखलुअपरउपायोभविष्यति ५५ तस्यैवार्यस्यकृतोभूत्वाइदमलंकारमार्यायैउपनय ५६। त्वंतावद्चौरःसोपिअनृतः
अनृणःआर्यायास्वकोलंकारउपगतोभवति ५७। अयिउपनयान्यथाअतिसाहसं ५८। साधुमदनिकेसाधुअभुजिष्यायेवमंत्रितं ५९। तेनत्वमस्मिन्कामदेवगेहेमुहूर्तंतिष्ठयावदार्यायै हे९
येतवागमनंनिवेदयामि ६०। आर्येएषखलुचारुदत्तस्यसकाशाद्ब्राह्मणआगतः ६१। हेचेटितस्यकृतेइतिकथंत्वंजानासि ६२। आर्येआत्मनःकृतेअपिनजानासि ६३। युज्यतेप्रविशतु
६४। यदार्याआज्ञापयतिप्रविशतुशर्विलकः ६५। आर्यवंदेसमाश्वस्तास्वार्यः ६६। आर्यममापितावस्मतिसंदेशंतत्रार्यानियतु ६७। प्रतीच्छतुआर्यामदनिकां ६८। अहमार्यचारुदत्तेनभ
णितायइममलंकारंसमर्पयिष्यसितस्यत्वयामदनिकादातव्यातत्सएवएतांतेददातीतिएवंआर्येणावगंतव्यं ६९। कोत्रप्रवहणिकः ७०। आर्यसज्जंप्रवहणं ७१। चेटिमदनिकेसुदृ
ष्टांमांकुरुदृष्टासिआरोहप्रवहणंस्मरसिमां ७२। परित्यक्तास्मिआर्यायाः ७३। सांप्रतंत्वमेववंदनीयासंवृत्तातत्गच्छआरोहप्रवहणंस्मरसिमां ७४ एवंनेदंतस्परंनयतुमांआर्यपुत्रःस
मीपंगुरुजनानां ७५। अथकिं ७६ यदार्याआज्ञापयति ७७। यथाआर्यपुत्रोभणतिअप्रमत्तेनतावदार्यपुत्रेणभवितव्यं ७८। आर्येदिष्ट्यावर्धसेआर्यचारुदत्तस्यसकाशात्ब्राह्म
णआगतः ७९। अहोरमणीयताअस्यादिवसस्यतद्यथाटिसादरंबंधुलेनसमंप्रवेशयैनं ८०। यदार्याआज्ञापयति ८१। आश्चर्यंभोःयत्पश्यणकुवेरनिर्जितेनराक्षसराजोरावणःपुष्प
केणविमानेनगच्छतिअहंपुनर्ब्राह्मणोकृततपश्चरणोविकूर्णेणनगरनारीजनेनगच्छामि ८२। प्रेक्षतांआर्यःअस्माकंवृत्तगेहद्वारं ८३। अहो। सलिलसिक्तमार्जितहरितोप
लेपनस्यविविधसुगंधकुसुमोपहारचित्रितभूमिकाभागस्यगगनतलालोकनकौतूहलदूरोन्नामितशीर्षस्यदोलायमानावलंबितैरावर्णहस्तभ्रमायितमल्लिकादामगुणालंकृतस्य

स ३ ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ महाक्षुरवृक्षस्कंधदुर्भेद्यवज्रनिरंतरप्रतिबद्धकनककपाटस्य २

८·भा·घा· समुच्छ्रितदंतिदंततोरणावभासितस्य महारजनोपरागोपशोभिना पवनबलांदोलनाललज्जंचलाग्रहस्तेन इतएहीति व्याहरतेव मां सौभाग्यपताकानिवहेनोपशोभितस्य तोरण
॥२॥ रणस्तंभवेदिकानिःक्षिप्तसमुल्लसद्धरितचूतपल्लवललामस्फटिक मंगलकलशाभिरामोभयपार्श्वस्य दुर्गतजनमनोरथायासकरस्य वसंतसेनाभवनद्वारस्य सश्रीकता। य
सत्यं मध्यस्थस्यापि जनस्य दृष्टिमाकारयति।८४। एतु २ इमं प्रथमं प्रकोष्ठं प्रविशत्वार्यः।८५ अत्रापि प्रथमप्रकोष्ठे शशिशंखमृणालसच्छायाः विनिहितचूर्णमुष्टिपांडुरा विवि
लप्रतिबद्धकांचनसोपानशोभिताः प्रासादपंक्तयः अवलंबितमुक्तादामभिः स्फटिकवातायनमुखचंद्रैर्निध्यायंतीवोज्जयिनीं। श्रोत्रियइव सुखोपविष्टो निद्रायते दौवारिकः। स दध
फलमोदकेन प्रलोभिता न भक्षयंति वायसा बलिं सुधासवर्णतया। आदिशतु भवती।८६। एतु २ आर्य इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्यः।८७ इहापि द्वितीयस्मिन्प्रकोष्ठे पर्यंतोपनीतय
सबुसकवलसुपुष्टा घृताभ्यक्तविषाणा बद्धाः प्रवहणबलीवर्दाः। अयमन्यतरो ऽवमानित इव कुलीनो दीर्घं निःश्वसिति सैरिभः। इतश्च अपनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीव
मेषस्य। इत इतोपरेषामश्वानां केशकल्पना क्रियते। अयमपरः पाटच्चर इव दृढबद्धो मंदुरायां शाखामृगः। इतश्च भक्तखुतघृतमिश्रं पिंडं हस्ती प्रतिग्राह्यते हस्तिपकैः। आ
दिशतु भवती।८८। एतु २ आर्यः इमं तृतीयं प्रकोष्ठं प्रविशत्वार्यः।८९ इहापि तृतीये प्रकोष्ठे इमानि तावत्कुलपुत्रजनोपवेशननिमित्तं विरचितान्यासनानि। अर्धवाचितं मंचे तिष्ठति पु
स्तकं। एतच्च मणिमयसारिकासहितपाशकपीठं। इमे चापरे संधिविग्रहचतुरा विविधवर्णिकाविच्छित्तिचित्रफलकाग्रहस्ताः इतस्ततः परिभ्रमंति गणिकावृद्धविटाः। आदिशतु भव
ती।९०। एतु २ आर्यः इमं चतुर्थं प्रकोष्ठं प्रविशत्वार्यः।९१। आश्चर्यं भोः इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिता जलधरा इव गंभीरं नदंति मृदंगाः। क्षीणपुण्या इव गगनात्तारका
निपतंति कांस्यतालाः। मधुकरविरुतमधुरं वाद्यते वंशः। इयमपरा ईर्ष्याप्रणयकुपितकामिनीवांकारोपिता करुहपरामर्शेन सार्यते वीणा। इमाश्चापराः कुसुमरसमत्ता इव
मधुकर्यो ऽतिमधुरतरं प्रगीता गणिकादारिकाः नृत्यंते नाट्यं पठ्यंते सशृंगाराः अपवातिताः। गवाक्षेषु वातं गृह्णंति सलिलगर्गर्यः। आदिशतु भवती।९२ एतु २ आर्यः इमं पंचमं
प्रकोष्ठं प्रविशत्वार्यः।९३। आश्चर्यं भोः। इहापि पंचमे प्रकोष्ठे अयं दरिद्रजनलोभोत्पादनकरमाहंति उग्रवातो हिंगुतैलगंधः। विविधसुरभिधूमोद्गारैर्नित्यं संतप्यमानं निः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सितीवमहानसंद्वारमुखैः। अधिकमुत्सुकायते मांसाभ्यमानकृविधसदृष्यभोजनगंधः। अयमपरो जीर्णवस्त्रमिवहलपटरूद्रपेत्निंधावति रूपिदारकः। विविधाहारविकारमुपसा
धयति सूपकारः। बध्यंते मोदकाः। पच्यंते चापूपकाः। अपीदानीमिह परिविष्टं पुंस्त्वइजिपादोदकं लप्स्ये। इह गंधर्वाप्सरोगणैरिव विविधालंकारशोभितैर्गणिकाजनैर्बंधुलैश्च यत्स
त्यं स्वर्गायितेदं गेहं। भोः के यूयं बंधुलानाम। । आदिश्यतु भवती ।९४। एतु २ आर्यः इमं षष्ठं प्रकोष्ठं प्रविशत्वार्यः ।९५। आश्चर्यं भोः। इहापि षष्ठे प्रकोष्ठे अमूनि तावत्सुवर्णरत्नानां
कर्मतोरणानि नीलरत्नविनिक्षिप्तानि इंद्रायुधस्थानमिव दर्शयंति। वैडूर्यमौक्तिकप्रवालकपुष्परागेंद्रनीलकर्केतरकपद्मरागमरकतप्रभृतीन् रत्नविशेषान् अन्योन्यं विचार
यंति शिल्पिनः। बध्यंते जातरूपैर्माणिक्यानि। घट्यंते सुवर्णालंकारा रक्तसूत्रेण। अथ्यंते मौक्तिकाभरणानि। घृष्यंते धीरं वैडूर्याः। छिद्यंते शंखाः। शाणघर्षणेन निर्मायंते प्रवा
लकाः। शोष्यंते आर्द्रकुसुमप्रस्तराः। साय्यते कस्तूरिका। विशेषेण घृष्यते चंदनरसः। संयोज्यंते गंधयुक्तयः। दीयते गणिकाकामुकयोः सकर्पूरं [illegible]लं। अवलोक्यते सकटाक्षं।
प्रवर्तते हासः। पीयते चानवरतं ससीत्कारं मदिरा। इमे चेटाः इमाश्चेटिकाः। इमे अपरे अवधीरितपुत्रदारवित्ता मनुष्याः। आसवकरकापीतमदिरैर्[illegible]णिकाजनैर्ये मुक्तास्तेपि
बंति। आदिश्यतु भवती ।९६। एतु २ आर्यः इमं सप्तमं प्रकोष्ठं प्रविशत्वार्यः ।९७। इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहंगवाटीसुखनिषण्णानि अन्योन्यचुंबनपराणि सुखमनुभवंति पा
राव[illegible]तमिथुनानि। दधिभक्तपूरितोदर ब्राह्मण इव सूक्तं पठति पंजरशुकः। इयमपरा स्वामिसंमाननालब्धप्रसरेव गृहदासी अधिकं कुरकुरायते मदनसारिका। अनेकफ
लरसा[illegible]स्वादप्रहृष्टकंठा कुंभदासीव कूजति परपुष्टा। आलंबिता नागदंतेषु पंजरपरंपराः। योध्यंते लावकाः। आलाप्यंते पंजरकपोताः। इतस्ततो मणि[illegible]चित्रित इवा
यं सहचरीसहितः संहर्षेण नृत्यन् रविकिरणसंतप्तं पक्षोत्क्षेपैर्विधुवतीव प्रासादं गृहमयूरः। इतः पिंडीकृता इव चंद्रपादाः पदगतिं शिक्षंतीव कामिनीनां पश्चात्परिभ्रम
ति राजहंसमिथुनानि। एते अपरे वृद्धश्रेष्ठ इवेतस्ततः संचरंति गृहसारसाः। आश्चर्यं भोः। प्रसारणं कृतं गणिकाया नानापक्षिसमूहैः। यत्सत्यं खलु नंदनवनमिव मे ग
णिकागृहं प्रतिभासते। आदिश्यतु भवती। ।९८। एत्वार्यः इममष्टमं प्रकोष्ठं प्रविशत्वार्यः ।९९। हे क एष पट्टप्रावारकप्रावृतो धिकतरं अत्यद्भुतपुनरुक्तालंकारालंकृतः अं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·घा· गर्भगेहैः परिस्खलन् इतस्ततः ...भ्रमति । आर्य एष आर्याया अयं भ्राता भवति । कियत्तपश्चरणं कृत्वा वसंतसेनायाः भ्राता भवति । अथवा मातावत् यद्यपि राष्ट्र उत्पलः स्नि
३०॥ ग्धश्च सुगंधश्च तथापि श्मशान वीथ्यां जात इव चंपक वृक्षः अनभिगमनीयो लोकस्य । को एषा पुनः कुसुम्भप्रावारकप्रावृता उपानद्युगल निःक्षिप्त तैलचिक्कणैः पादैः उ
च्चासनोपविष्टा तिष्ठति । आर्य एषा खल्वस्माकं आर्याया माता । अहो अस्या अपवित्र डाकिन्या उदर विस्तारः तत्किमेतां प्रविश्य महादेवमिव द्वारशोभा... हताश
मेवमुपहसास्माकं मातरं । एषा खलु चातुर्थिकेन पीड्यते । भगवन् चातुर्थिक एतेनोपचारेण मामपि ब्राह्मणमालोकय । हताश मरिष्यसि । दास्याः पुत्र ... इत्वरः अन्यो
नज्वरोन्मत्त एव सीधुसुरासवमत्ता एतादृशीमवस्थां गता हि अनिबध्याय ह्रियते । अत्र माता भवति शृगालसहस्रयात्रा । हे भवति किं युष्माकं यानपात्राणि वहंति । आर्य न
हि न हि । किं वा अत्र प्रपद्यते युष्माकं खलु प्रेमनिर्मलजले मदनसमुद्रे स्तननितंबजघनान्येव यानपात्राणि मनोहराणि । एवं वसंतसेनाया बहुवृत्तांतं अष्टप्रकोष्ठभवनं प्रेक्ष्य
यत्सत्यं जानामि एकस्थमिव त्रिविष्टपं दृष्टं प्रशंसितुं नास्ति मे वाग्विभवः । किं तावद्गणिकागृहं अथवा कुबेरभवनपरिच्छेद इति । कुत्र युष्माकं आर्या ।१०। आर्य एषा वृक्षवा
टिकायां तिष्ठति तस्मात्प्रविशतु आर्यः ।१। आश्चर्यं भोः । अहो वृक्षवाटिकायाः सश्रीकता न्यग्रोधरीति कुसुमाय अरोपिता अनेक पादपाः निरंतर पादपतल निर्मिता युवतिजनजघन
प्रमाणा पट्टदोला सुवर्णयूथिका शेफालिका मालती मल्लिका नवमल्लिका कुरवका अतिमुक्तक प्रभृति कुसुमैः स्वयं निपतितैः यत्सत्यं लघूकरोति नंदनवनस्य सश्रीकतां । इतश्च
उदयत्सूर्यसमप्रभैः कमलरक्तोत्पलैः संध्यायत इव दीर्घिका । अपि च । एष अनेक वृक्षो नवनिर्गतकुसुमपल्लवो भाति । सुभट इव समरमध्ये घनलोहितपंकचर्चितः । तत्कु
त्र युष्माकमार्या ।२। आर्य अवनमय दृष्टिं पश्य आर्यां ।३। स्वस्ति भवत्यै ।४। उपविशतु भवती ।५। हे कुशलं ।६। उपलक्षितं दुष्टविलासिन्या । अथ किं ।७। शृणोतु भवती । तत्र
भवान् चारुदत्तः शीर्षे अंजलिं कृत्वा आर्यां विज्ञापयति ।८। मया तत्सुवर्णभांडं विश्रंभात् आत्मनः कृतेति निकल्प्य द्यूते हारितं स च सभिको राजावश्यकारी न ज्ञायते कुत्र गत इति ।९।
आर्यो दिष्ट्या वर्धसे आर्यो द्यूतकरः संवृत्तः ।१०। कथं चौरेणापहृतं द्यूते हारितमिति भणति अत एव काम्यते ।११। तत्स्य कारणात् गृह्णातु भवती इमां रत्नावलीं ।१२। किं दर्शयामि तम

गोंडीरतया ।१३।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारं। अथ वानतावत्। १३। किंतावन्न गृह्णाति भवती इमां रत्नावलीं। १४। मैत्रेय कथं न ग्रहीष्यामि रत्नावलीं। कथं हीन कुसुमादपि सहकारपादपात् मकरंदबिंदवो निपतंति।
आर्य विज्ञापयसि तं घृतकरं मम वचनेनार्य चारुदत्तं। अहमपि प्रदोषे आर्यं प्रेक्षितुमागमिष्यामि। १५। किमन्यत्तत्र गत्वा ग्रहीष्यति। हे भवति भणामि। निवर्ततामस्मात् गणिका
प्रसंगादिति। १६। चेटि गृहाणैतमलंकारं। चारुदत्तमभिरंतुं गच्छामः। १७। आर्ये पश्य पश्य उन्नमत्यकालदुर्दिनमिति। १८। चेटि हारं गृहीत्वा त्वरितमागच्छ। १९। चतुर्थोंकः। अथ पंचमः।
अहो गणिकायाः लोभः अनुरागता च यतो न कथा कृतान्या अनादरेणैव अभणित्वा किमपि एवमेव गृहीता रत्नावली। एतावत्या ऋद्ध्यानलया अहं भणितः आर्य मैत्रेय विश्राम्यतु
मल्लकेन पानीयं पीत्वा गम्यतामिति। तन्मा तावद्दास्याः पुत्र्या गणिकायाः। सुष्ठु खलु उच्यते अकंदसमुत्थिता पद्मिनी अवंचको वणिक् अचोरः सुवर्णकारः अकलहो ग्रामसमाग
मः अलुब्धा गणिकेति। दुष्करमेते संभाव्यंते। तत्प्रियवयस्यं गत्वा अस्मात् गणिकाप्रसंगात् निवर्तयामि। अयं प्रियवयस्यो वृक्षवाटिकायामुपविष्टस्तिष्ठति। तद्यावदुपसर्पा
मि। स्वस्ति भवते वर्धतां भवान्। १। उपविष्टोस्मि। २। तत्खलु कार्यं विनष्टं। ३। कुतोस्माकमेतावद्भागधेयं यत्तन्नवनलिनकोमलं अंजलिं मस्तके कृत्वा प्रतिगृहीता। ४। भो कथं न वि
नष्टं यत्त्वभुक्तपीतस्य चोरैरपहृतस्य अप्रमूल्यस्य सुवर्णभांडस्य कारणात् चतुःसमुद्रसारभूता रत्नमाला हारिता। ५। भो वयस्य एतदपि मे द्वितीयं संतापकारणं यत्सर्वो जनः
तं संज्ञया यत्संतापवारितं मुखं कृत्वा अहमुपहसितः। तदहं ब्राह्मणो भूत्वा इदानीं भवंतं शीर्षेण पतित्वा विज्ञापयामि। निवर्त्यतामात्मा अस्मात् बहुप्रत्यवायात् गणिकाप्रसंगात्।
गणिका नाम पादुकांतरप्रविष्टेव शर्करा दुःखेन पुनर्निराक्रियते। अपि च। अहो वयस्य गणिका हस्ती कायस्थो भिक्षुः चाटो रासभश्च यत्रैते निवसंति तत्र दुष्टा अपि न जायं
ते अपि तु जायंत एव। ६। यथा एष दुर्ध्वं प्रेक्ष्य दीर्घं निश्वसिति तथा तर्कयामि मया निवार्यमाणस्य अधिकतरं वृद्धा अस्योत्कंठा। तत्सुष्ठु खल्विदमुच्यते कामो वामः [illegible]। भो वय
स्य भणितं च तया भणता चारुदत्तं अद्य प्रदोषे मयात्रागंतव्यमिति। तत्तर्कयामि रत्नावल्या अपरितुष्टा अपरं याचितुं आगमिष्यतीति। ७। अवेतमानवाः। यथा अपापा वर्षति अप्र... खंडं
तथा द्रीभवति पृष्ठचर्म। यथा लगति शीतवातस्तथा वेपते मे हृदयं। ८। वंशं वादयामि सप्तच्छिद्रं सुशब्दं वीणां वादयामि सप्ततंत्रीं नदंतीं। गीतं गायामि गर्दभस्यानुरूपं कोमेगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८·भा·घा·
।११।

नेतुं बुरूर्नरदोवा। आज्ञप्तोस्मि आर्यया वसंतसेनया कुंभीलक गच्छ त्वं मम आगमनं आर्यचारुदत्तस्य निवेदयेति। तद्यावत् आर्यचारुदत्तस्य गेहं गच्छामि। एष आर्यचारुदत्तो वृक्षवाटिकाया
तिष्ठति। एषोपि स दुष्टबटुकः तद्यावदुपसर्पामि। कथमाच्छादितं द्वारं वृक्षवाटिकायाः। भवतु एतस्य दुष्टबटुकस्य संज्ञां ददामि। ९। अयेक इदानीं एष प्राकारवेष्टितमिव कपि
मं लोष्टकेस्ताडयति। १०। दास्याः पुत्र दुष्ट पारावत तिष्ठ यावदेतेन दंडकाष्ठेन सुपक्वमिव चूतफलं अस्मात् प्रासादात् भूमौ पातयिष्यामि। ११। कथं पारावतं पश्यति मां न प्रेक्षते भव
अपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि। १२। कथं कुंभीलकः तद्यावदुपसर्पामि। अरे कुंभीलक प्रविश स्वागतं ते। १३। आर्य वंदे। १४। अरे कुतस्त्वं ईदृशे दुर्दिने अंधकारे
गतः। १५। अरे एषा सा। १६। का एषा का। १७। एषा सा। १८। किमिदानीं दास्याः पुत्र दुर्भिक्षकाले वृद्धरंकइव उर्ध्वं किं श्वासायसे एषा सा सेति। १९। अरे त्वमपि इदानीं इंदुमखका मु
इव सुष्टु किं का कायसे का केति। २०। तत्कथय। २१। भवतु एवं भणिष्यामि। अरे प्रश्नं ते दास्यामि। २२। अहं ते मस्तके पादं दास्यामि। २३। अरे जानीहि तावत्। तेनहि। कस्मिन्काले चूताः
कुलवंतो भवंति। २४। अरे दास्याः पुत्र ग्रीष्मे। २५। अरे नहि नहि। २६। किमिदानीमत्र कथयिष्यामि। भवतु चारुदत्तं गत्वा प्रक्ष्यामि। अरे मुहूर्तकं तिष्ठ। भो वयस्य प्रक्ष्यामि तावत् का
न्काले चूता उन्मुकुलाः भवंति। २७। मूर्ख वसंते। २८। द्वितीयं ते प्रश्नं दास्यामि। सुसमृद्धानां ग्रामाणां को रक्षां करोति। २९। अरे रथ्या। ३०। अरे नहि २। ३१। भवतु संशयपतितोस्मि भ
तु चारुदत्तं पुनरपि प्रक्ष्यामि। ३२। अरे दासीपुत्र सेना। ३३। अरे द्वे अप्येकस्मिन् कुरु लाघी भ्रण। ३४। नूनं परिवृत्य भण। ३५। सेनावसंते। ३६। अरे मूर्ख बटुक पदे परिवर्तय। ३[illegible]।
रे अक्षरपदे परिवर्तय। ३८। वसंतसेना। ३९। एषा सा आगता। ४०। तद्यावच्चारुदत्तस्य निवेदयामि। एषा वसंतसेना आगता। ४१। यदि मे वचनेन प्रत्ययसे तदेनं कुंभीलकं पृच्छ। अ
दास्याः पुत्र कुंभीरक उपसर्प। ४३। आर्य वंदे। ४४। एषा सा आगता वसंतसेना। ४५। यावदार्याया निवेदयामि। ४६। भो अपि जानासि किंनिमित्तं इहदृशे दुर्दिने आगतेति। ४७। मय
ज्ञातं अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभांडं इति न परितुष्टा अपरं याचितुमागता। ४८। भाव सुष्टु न भणितं। ४९। एवं नेदं तत्कथमेषोपरः। ५०। भाव पश्य २। ५१। एषोपरः। ५[illegible]
भाव एवं नेदं तत्स्वरूपम्। ५३। भाव एवं तदेव एतदहं। ५४। यद्भवानाज्ञापयति। ५५। स्वस्ति भवत्यै। ५६। आर्य वंदे स्वागतमार्यस्य भाव एषा छत्रधारिका भावस्य एवं भवतु। ५७। आर्य मैं

।४१।
× भो चारुदत्त धनिकस्ते आगतः। यदि कुले नास्ति तद्द्वारे अस्ति ४

*22

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यकुत्र युष्माकं द्यूतकरः ५८। आश्चर्यं भो द्यूतकर इति भणंत्या। लंघ्यतः प्रियवयस्यः। हे भवति एष खलु वृक्षवाटिकायां ५९। आर्यकायुष्माकं शुष्कवृक्षवाटिकोच्यते ६०। हे भवति यत्र न खा
द्यते न पीयते ६१। तस्मात्प्रविशतु भवती ६२। अत्र प्रविश्य किं मया भणितव्यं ६३। द्यूतकर अपि भुक्तं ते प्रदोष इति ६४। अपि पारयिष्यामि [illegible]। अवसर एव तां पारयिष्यति ६७। प्रविशतु
भवती ६६। अपि द्यूतकरस्य शुभं ते प्रदोषः ६८। इदमासनमुपविशतु भवती ६९। यज्ञवानाज्ञापयति ६९। आर्य मैत्रेय तिष्ठ त्वं अहमेवार्यां शुश्रूषयिष्यामि ७०। भो वयस्य प्रष्टामि तावत्तत्र
भवतीं किमपि ७१। अथ किं निमित्तं पुनरीदृशे प्रनष्टचंद्रलोके दुर्दिनांधकारे आगता भवती ७२। आर्ये उज्वलो ब्राह्मणः ७३। ननु निपुण इति भण ७४। एषा खल्वार्या एवं प्रष्टुमागता
कियत्तस्या रत्नावल्या मूल्यमिति ७५। भो भणितं मया यथा अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभांडं न परितुष्टा अपरं याचितुमागता ७६। सा खलु आर्यायां आत्मनः कृते इति
भणिता द्यूते हारिता स च सभिकः राजापथ्यकारी न ज्ञायते कुत्र गत इति ७७। हे भवति मंत्रितमेव मंत्र्यते ७८। यावत्सोऽन्विष्यते तावदेव गृहाण सुवर्णभांडं ७९। अतिमात्रमार्यो निध्या
यति तत्किं दृष्टपूर्वं सत्ते ८०। हे भवति शिल्पकुशलतया अवबध्नाति दृष्टिं ८१। आर्य वंचितोसि दृष्ट्या तदेवेदं सुवर्णभांडं ८२। भो वयस्य तदेवेदं सुवर्णभांडं यदस्माकं गृहे चोरैरपहृतं ८३।
भो वयस्य सत्यं शपामि ब्राह्मणेन ८४। भो दृष्टामि ननु कृत इदं समासादितमिति ८५। एवमिव ८६। एवमिव ८७। एवमिव ८८। आर्ये अथ किं ८९। अत एव कांप्यसे ९०। भो अलं अतिमात्रसंता
पितैं हे भवति समर्प्यतां मम स्नानशाटिका ९१। आर्य चारुदत्त युक्तं नेदं अनया रत्नाइ भंजनं तुलयितुं ९२। चेटि किं भवत्या इहैव सुप्तव्यं ९३। आर्य मैत्रेय अतिमात्रमिदानीमुद्घत
मालानं दर्शयसि ९४। भो वयस्य एष खलु उत्सारयन्निव सुखोपविष्टं जनं पुनरपि विस्तारवारिधाराभिः प्रविष्टः पर्जन्यः ९५। दास्याः पुत्र दुर्दिन अनार्य इदानीमसि त्वं यदेवं
भवतीं विद्युताभीषयसि ९६॥ पंचमोंकः॥ कथमद्याप्यार्यो न विबुध्यते। भवतु प्रविश्य प्रतिबोधयिष्यामि। १। उत्तिष्ठतु २ आर्या प्रभातं संवृत्तं। २। कथं रात्रिरेव प्रभातं संवृत्तं। ३।
अस्माकं मनसि प्रभातं आर्यायाः पुना रात्रिरेव। ४। चेटि कुतः पुनर्युष्माकं द्यूतकरः। ५। आर्य वर्धमानकं समादिश्य पुष्पकरंडकं जीर्णोद्यानं गत आर्य चारुदत्तः ६। किं समादि
ष्टेत्यादिष्टवत ७। योजय रात्रौ प्रवहणं वसंतसेना गच्छतु इति ८। चेटि किं न मया गंतव्यं। ९। आर्ये यत्र चारुदत्तः। १०। चेटि सुष्ठु न निध्यातो रात्रौ रत्नावलीमस्य संप्रेक्षिष्ये। । चेटि किं प्र

वल्या ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृ·भा·घा· विष्टा। हमिहाभ्यंतरचतुःशालं ।११। न केवलमभ्यंतरचतुःशालकं सर्वजनस्यापि हृदयं प्रविष्टा ।१२। अपि संतप्यते चारुदत्तस्य परिजनः ।१३। संतप्यति ।१४। कस्मात् ।१५। यदस्मात् आर्यमि
॥१२॥ ष्यति ।१६। न दासी मया प्रथमं संतप्तव्यं । रे चेटि गृहाण मां रत्नावलीं मम भगिन्यै आर्याधूतायै गत्वा समर्पय । वक्तव्यं च अहं श्री चारुदत्तस्य गुणनिर्जिता दासी [illegible] युष्माकमपि
तदेषा तवैव कंठाभरणं भवतु रत्नावली ।१७। आर्ये कुपिष्यति चारुदत्त आर्यायै तावत् ।१८। गच्छ न कुपिष्यति ।१९। यदाज्ञापयसि ।२०। आर्ये भणति आर्या धूता आर्ये ने
युष्माकं प्रसादः कृत न युक्तं समेतां गृहीतुं । आर्यपुत्र एव ममाभरणविशेष इति जानातु भवती ।२१। एहि वत्स शकटिकया क्रीडावः ।२२। रदनिके किं मे एतया मृत्तिकाशकटि
कया तामेव सुवर्णशकटिकां देहि ।२३। जात कुतोऽस्माकं सुवर्णव्यवहारः । तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि । तद्यावद्विनोदयाम्येनं आर्यावसंतसेना
समीपमुपसर्पिष्यामि । आर्ये प्रणमामि ।२४। रदनिके स्वागतं कस्य पुनरयं दारकः अनलंकृतशरीरोऽपि चंद्रमुख आनंदयति मे हृदयं ।२५। एष खलु आर्यचारुदत्त
पुत्रो रोहसेनो नाम ।२६। एहि मे पुत्रक आलिंगय । अनुकृतमनेन पितृरूपं ।२७। न केवलं रूपं शीलमपि तर्कयामि । एतेनार्यचारुदत्त आत्मानं विनोदयति ।२८। आर
